IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)

An International Open Access, Peer-reviewed, Refereed Journal

# वाल्मीकिवेरथिते रामायण निकुम्भिलायगणस्य वैश्यतम्

**DSV Jagannatha Sharma**
Assistant Professor
Kalpa Department
S.V. Vedic University
Tirupati

**प्रस्तावना**

संस्कृतवाङ्मयं वैदिकलौकिकभेदेन द्विधा विभक्तम्। तत्र वेदाः, पुराणानि वैदिकवाङ्मये, काव्यानि लौकिकवाङ्मये चान्तर्भवन्ति। वेदेभ्यः अनन्तरं लौकिकवाङ्मये श्रीमद्रामायणमेव आद्यम् काव्यं भवति। रामायणञ्च ब्रह्मणा संकलनेनैव लोके आविर्भूतम्। वाल्मीकिमहर्षिः भृगुसम्भवः इति श्रीमद्भागवते स्पष्टम्। किरातः एव रामनामं जपन् महर्षित्वं प्राप्तवानिति पद्मपुराणे लिखितमस्ति। सैव कथा प्रसिद्धा वर्तते।

वाल्मीकिः ब्रह्मणः आदेशेन सप्तकाण्डात्मकं पञ्चशत्सर्गात्मकं, चतुर्विंशति सहस्रश्लोकात्मकं च रामायणं विरचितवान्। रामायणं ख्रीष्टपूर्वपञ्चशतकात्पूर्वं कदाचित् प्रणीतं न तु ततोऽर्वाक् इति आचार्यः रामचन्द्रमिश्रः बहुधा चर्चां कृत्वा प्रत्यपादयत्। पाणिनि कृत व्याकरणलक्षणहीनभाषाघटितत्वामपि रामायणस्य सिद्धान्तमिमं पोषयति।

**रामायणशब्दार्थः**

रामायणम्, रामस्य चरितान्वितम्, अयनम्, शास्त्रम् इति मध्यमपदलोपसमास इति अङ्गीकारः। एष अर्थः शब्दकल्पद्रुमे त्रिकाण्डशेषस्तः इति। शाखमार्तिवादित्वात् मध्यमपदलोपसमासः। रामस्य चरितमित्युक्ते काव्यस्य अग्रहणात् षष्ठीसमासः न विहितः। अतः रामचरितात्मकं शास्त्रात्मकं काव्यं रामायणमिति फलितोऽर्थः।

**यज्ञस्वरूपम्**

मानवानां शारीरक – मानसिक – आत्मशान्तये प्राचीनमहर्षयः अनेकविधव्यवस्थाः अकल्पयन्। तया व्यवस्थया आत्मशुद्धिः, आत्मबलवृद्धिः, आरोग्यरक्षा च भवति। तासु व्यवस्थासु यज्ञः अन्यतमः।

वैदिकविधानेन हवन – पूजा – मन्त्रोच्चारणायुक्तः लोकहिताय क्रियमाणा पूजा एव यज्ञमित्यभिधीयते। यज्ञः देवमानवयोर्मध्ये सम्बन्धस्थापनमार्गमित्यभिधीयते। अग्निदेवस्य स्तुत्या एव यज्ञः प्रारभ्यते।

इज्यन्ते देवता अत्र इति यज देवपूजादौ नङ् प्रत्यये यज्ञः इति शब्दः सिद्ध्यति। यज्ञ एव सर्वकर्मश्रेष्ठ इति ब्राह्मणग्रन्थेषूक्तम्।

**रामायणे यज्ञप्रस्तावना**

रामायणे बालकाण्डे दशरथः अनपत्यकारणात् दुःखितस्सन् प्राग् सनत्कुमारोक्तत्वात् ऋष्यश्रुङ्गमाहूय अश्वमेधयागमकरोत्। तत्पश्चात् पुत्रकामेष्टियागमप्यकरोत्। यज्ञकुण्डादागत पायसात् चत्वारः पुत्राः सञ्जाताः। विश्वामित्रेणाऽपि यागः कृतवानिति बालकाण्डादेव ज्ञायते। ततः युद्धकाण्डे इन्द्रजिता कृत निकुम्भिलयागः, उत्तरकाण्डे श्रीरामेण कृत अश्वमेधयागः सुप्रसिद्धा एव।

**को नाम निकुम्भिलयागः**

रावणस्य कुलदेवता भवति निकुम्भिलादेवी। अस्याः अपरं नाम प्रत्यङ्गिरादेवी। निकुम्भिलादेवालयः श्रीलङ्कायां प्रसिद्धोऽस्ति। इयं देवी भवान्याः अन्यरूपिणी एव। रावणस्य पुत्रः मेघनाथः असुरगुरोः शुक्राचार्यस्य

साहाय्येन निकुम्भिलादेव्याः तान्त्रिक साधनां कृत्वा प्रसन्नमकरोत्। देवी निकुम्भिला तस्मै मेघनादाय दिव्यं रथमेकं प्रदत्तवती। तथैव यदा युद्धं भवेत्तदा सा देवी निकटवर्तिनी भूत्वा युद्धे विजयाय साहाय्यं कुर्यादेव। मेघनाथस्य पूर्वं नाम निकुम्भाला। अयं उग्रदेव्याः निकुम्भिलादेव्याः पूजां कृत्वा प्रसन्नतां प्राप्य इन्द्रं जितवानित्यतः इन्द्रजित् इत्यपरं नाम प्राप्तवान्। प्रत्यङ्गिरादेव्याः यज्ञसमाप्त्यनन्तरं विजयं तथ्यमिति निश्चप्रचम्। निकुम्भिलादेव्याः शिरः सिंह इव शरीरं स्त्रीरूपमिव भवति।

**निकुम्भिलायागः कदा करणीयः**

चन्द्रसूर्याभ्याम् शासिताजेयनक्षत्रम् उत्तराषाढात् दृग्गोचरसमये, सूर्यः मीनराश्यां स्थिते तथा मङ्गलात् दृग्गोचरसमये चन्द्रः धनुराश्यां मङ्गलेन वा शनिना वा युक्तस्तर्हि प्रत्यङ्गिरादेव्याः ऊर्जा प्राप्तुं यागः करणीयः। उत्तराषाढानक्षत्रे या अप्रधृष्याशक्तिः निहिता सा विजयप्रदात्री भवति। तस्मिन् दिने निकुम्भिलायाः पूजा अर्चना च करणे सति नकारात्मकप्रभावः, दुष्टदृष्टिश्च दूरी भवति।

**रामायणे निकुम्भिलयागप्रस्तावना**

रामायणे युद्धकाण्डे युद्धारम्भे इन्द्रजित् मायावी निशायुद्धमकरोत्। इन्द्रजित् रामलक्ष्मणौ नागपाशबद्धौ चकार। नागपाशबद्धौ रामलक्ष्मणौ मृतौ इति मत्वा इन्द्रजित् प्रतिनिवृत्तः। सीताऽपि शोकं प्राप्तवती। तयोः रामः प्रथमं प्रतिबद्धः लक्ष्मणं मृतं मत्वा बहुधा शुशोच। एवं स्थिते गरुडः स्वयं तत्रागत्य लक्ष्मणं नागपाशेभ्यः मुक्तमकरोत्। पुनः सङ्ग्रामः प्रचलितः। अनन्तरं रावणः क्रमेण स्वसैन्याध्यक्षान् एकैकशः युद्धार्थं प्रेषयामास। प्रथमं धूम्राक्षः प्रेषितः, हनुमतः गदाप्रहारेण हतश्च। ततः वज्रदष्ट्रः प्रेषितः, स च अङ्गदेन मारितः। ततः अकम्पनः, प्रहस्थः, क्रमेण हनुमता, नीलेन च ताडिताः मृताश्च। स्वयं रावणः युद्धार्थमागत्य रामेण पराजितः, विमुक्तश्च। अद्य त्वं क्षन्तोऽसि स्वस्थः भूत्वा पुनरागच्छेति तं प्रेषयामास। ततः रावणेन कुम्भकर्णः प्रेषितः रामेण हतश्च। अङ्गदेन नरान्तकः, ऋषभेण देवान्तकः मृतश्च। ततः रावणेन प्रेरितः इन्द्रजित् युद्धार्थमागतः। इन्द्रजित् यज्ञभूमौ प्रविश्य अग्निस्थापनेन विधिपूर्वकं हवनं कृतवान्। तत्पश्चात् अन्तर्धानशक्त्या सम्पन्नस्सन् सुन्दररथमारुह्य, धनुर्युक्तः, प्रज्वलिताग्निना प्रकाशितः इन्द्रजित् सङ्ग्रामे प्रविवेश। स्वमायया सर्वत्र अन्धकारं चकरा। इन्द्रजित् पाषाणवृष्टिः रामलक्ष्मणयोरुपरि अपातयत्। रामलक्ष्मणौ अत्यन्तपराक्रमेण इन्द्रजितं नियोद्धुं प्रयतेते। परन्तु तस्य शक्तिः, वेगपूर्णगतिश्च द्रष्टुं न शक्नुयाताम्। क्रुद्धस्सन् लक्ष्मणः ब्रह्मास्त्रं प्रयोक्तुं सन्नद्धः। तद् विज्ञाय इन्द्रजित् युद्धात् पराङ्मुखो बभूव। लङ्कां प्राप्य पुनः पितुराज्ञया सैन्येन सह रामलक्ष्मणयोः वधां कर्तुं मायासीतां निर्माय हनुमतः पुरत एव तां जघान। राक्षसानां वानराणां मध्ये महान् युद्धो जातः। शतृणां बलौद्धत्यम् वीक्ष्य हनुमान् युद्धं स्थगयित्वा श्रीरामसमीपं गन्तुं प्रयतते।

**ततः प्रेक्ष्य हनुमन्तं व्रजन्तं यत्र राघवः।**
**स होतुकामो दुष्टात्मा गतश्चैतां निकुम्भिलाम्।।**[1]

हनुमतः गमनानन्तरम् इन्द्रजित् यज्ञकार्यं कर्तुं निकुम्भिलागुहां प्रविवेश। निकुम्भिलां प्राप्य पवित्राग्नौ विधिवत्पावकेन ज्वालयित्वा यज्ञं प्रारम्भमकरोत्। होमशोणिततर्पितः सन्ध्यागत आदित्य इव प्रकाशितः। हव्यप्रदानकरणसमये सैनिकाः महासमूहरूपेणागत्य इन्द्रजित्समीपे स्थितवन्तश्च। हनुमान् रामस्यान्तिकं गत्वा सीतायाः मरणवार्तां श्रावयामास। तच्छ्रुत्वा श्रीरामः रुदन् भूमौ पपात।

**तस्य तद्वचनं श्रुत्वा राघवः शोकमूर्छितः।**
**निपपात तदा भूमौ छिन्नमूल इव द्रुमः।।**[2]

तदा विभीषणः अचेतनं रामं दृष्ट्वा एवमब्रवीत् –

**मनुजेन्द्रार्तारूपेण यदुक्तस्त्वम् हनुमता।**

1. रामायणम् – 6-82.24
2. रामायणम् – 6-83-10

**तदयुक्तमहम् मन्ये सागरस्येव शोषणम्।।**[1]

हे राघव! दुष्टरावणोऽपि सीतां हन्तुं शक्नुयात्। इन्द्रजित् वानरान् स्वमायया जितवान्। अधुना इन्द्रजित् निकुम्भिला नामकारण्ये प्रविष्टः, अग्नौ आहुतिञ्च कर्तुमिच्छति। पवित्राग्नौ यदि आहुतिं समर्पयेत्तर्हि यः कोऽपि तं इन्द्रजितं जेतुं न शक्नोति अर्थात् स अजेयो भविष्यति।

**चैत्यम् निकुम्भिलाम् नाम यत्र होमं करिष्यति।**
**हुतावानुपायतो हि देवैरपि सवासवैः।।**[2]

अनुचितं शोकं त्यजतु। इन्द्रजिता क्रियमाणं निकुम्भिलायागं निरोद्धव्यम्। लक्ष्मणेन सह अहं महद्सैन्यं स्वीकृत्य तत्र गन्तुमनुज्ञां ददात्विति प्रार्थयामास। सीतायाः विषये सन्दहो विसर्जनीय एव। तच्छ्रुत्वा राघवः शोकवर्जितस्सन् धैर्यमवलम्ब्य वानरानुद्दिश्य एवमुवाच –

**रघुनन्दन वक्ष्यामि श्रूयतां मे हितं वचः।**
**साध्वयं यातु सौमित्रिर्बलेन महता वृतः।।**
**निकुम्भिलायां सम्प्राप्तं हन्तुं रावणिमाहवे।**
**धनुर्मण्डलनिर्मुक्तै राशीविषविषोपमैः।।**[3]

इन्द्रजित् स्वतपसा ब्रह्मणः ब्रह्मशिरः इत्यस्त्रं तथैव कामगाः तुरङ्गाश्च प्राप्तवान्। अधुना इन्द्रजित् निकुम्भिलायागाय सन्नद्धो जात इति कैश्चित् उक्तत्वात् शीघ्रं तत्र गन्तव्यमिति विचिन्त्य अनुज्ञां ददातु। ब्रह्मणा वरमेकं दत्तमासीत् इन्द्रजिते –

**निकुम्भिलामासम्प्राप्तमाहुताग्निं च यो रिपुः।**
**त्वामाततायिनं हन्यादीन्द्रशत्रो स ते वधः।।**
**वरो दत्तो महाबाहो सर्वलोकेश्वरेण वै।**
**इत्येवं विहितो राजन्वधस्तस्यैषा धीमतः।।**[4]

यदि इन्द्रजित् हतः तर्हि रावणोऽपि निश्चयेन म्रियते एव। तच्छ्रुत्वा श्रीरामः एवमवदत् - इन्द्रजित् अत्यन्तकुशलः, युद्धे वरुणं, सर्वदेवान् च असंज्ञान् कर्तुं सर्वसमर्थः। अकाशे सः कथं सञ्चरतीति न विज्ञास्यते। ततः रामः लक्ष्मणमेवमुवाच -

**यद्वानरेन्द्रस्य बालं तेन सर्वेणासंवृतः।**
**हनुमत्प्रमुखैश्चैव युयुतपैः सह लक्षणा।।**
**जाम्बवेनार्कपतिना सह सैन्येन संवृतः।**
**जहि तां राक्षससुतम् मायाबालसमन्वितम्।।**[5]

सुग्रीवेण सह हनुमतः आधिपत्येन जाम्बवता ससैन्यं गत्वा इन्द्रजितः वधं कुरु। तच्छ्रुत्वा लक्ष्मणः कवचं, खड्गं च धृत्वा वामहस्ते धनुः स्वीकृत्य रामस्य पादौ नमस्कृत्य वानरैः सह युद्धाय प्रस्थितः।

**स तां प्राप्य धनुष्या निर्माय योगमरिंदमः।**
**तस्थौ ब्रह्मविधानेन विजेतुं रघुनन्दनः।।**[6]

---

1. रामायणम् – 6-84-9
2. रामायणं – 6-84-14
3. रामायणं – 6-85-10,11
4. रामायणं – 6-85-14,15
5. रामायणं – 6-85-21,22
6. रामायणं – 6-85-34

तत् पश्चात् लक्ष्मणसमेतः सैन्यम् अभेद्यगुहायां प्रविष्टम्। तत्र विभीषणेन्द्रजितोः मध्ये वाग्विवादो जातः।

**विभीषणवचः श्रुत्वा रावणिः क्रोधमूर्चितः।**

**अब्रवीत् परुषं वाक्यं वेगेनाभ्युत्पपात च।।**[1]

मम बाणाघातेन यूयं सर्वे यमलोकं प्राप्स्यन्त्येव। तानि वचनानि श्रुत्वा क्रुद्धः लक्ष्मणः अभीतवदनस्सन् रावणिं प्रति एवमब्रवीत् –

**उक्तश्च दुर्गमः पारः कार्याणां राक्षस त्वया।**

**कार्याणां कर्मणाम् पारं यो गच्छति स बुद्धिमान्।।**[2]

इत्युक्त्वा लक्ष्मणः इन्द्रजितः पुरतः स्थित्वा युद्धाय सिद्धो जातः। उभयोर्मध्ये भीकरसङ्ग्रामः सञ्जातः। अन्ते इन्द्रजित् लक्ष्मणेन पराजितः हतश्च।

**उपसंहारः**

रामायणे अश्वमेधयागः, राजसूययागः, निकुम्भिलायागश्च प्रसिद्धाः। तत्र निकुम्भिलायागः विजयाय क्रियमाणो यागः। अत एव इन्द्रजित् तद्यागं कृत्वा सर्वान् हन्तुं प्रयतते मृतश्च।

**आधारग्रन्थसूची**

1. श्रीमद्रामायणम् – वाल्मीकिमहर्षिः – एम्. एल्. जे. प्रेस्. प्रैवेट् लिमिटेड् – मद्रास्।
2. संस्कृतसाहित्येतिहासः – पण्डित श्रीमधुसूदनप्रसादमिश्रः, चौखम्बा विद्याभवन्, वारणासी।

1. रामायणम् – 6-88-1

2. रामायणम् – 6-88-24